ज्ञेयानि । ण्यन्तात् सनि 'स्रवतिशृणोति—' (7-4-81) इत्यादिना विहितः अभ्यासस्येत्वविकल्पो नास्य भवति—जुज्यावयिषकः-षिका, इत्येव रूपम्, इति विशेषः ।

(629) "ज्रि अभिभवे" (I-भ्वादिः- 947. सक. अनि. पर.)

'अभिभवः=न्यूनीकरणम्, न्यूनीभवनं च । आद्ये सकर्मकः, द्वितीये त्वकर्मकः ।' इति **सि. कौमुदी** । **क्षीरस्वामी** तु 'जॄ' इति पठति । तन्मते जारकः, जरन् इत्यादीनि रूपाणि । **देवः क्षीरस्वामिसम्मतपाठस्या**-नुकूलः । यदाह—'जृणाति जीर्यति जरत्येकार्थे जारयत्यपि । (श्लो. 39)' इति । **धातुकाव्ये** तु 'ज्रि अभिभवे' इति पठित्वा, तदनुगुणः प्रयोगोऽपि प्रदर्शितः । यथा—

'श्रुत्यन्तवाचा ध्रुवया प्रदूनं घोरद्रवचक्रजिता**ज्रितारिम्**।' (2-35) इति ।

ज्रायकः-यिका, ज्रायकः-यिका, जिज्रीषकः-षिका, जेज्रीयकः-यिका ;

ज्रेता-त्री, ज्राययिता-त्री, जिज्रीषिता-त्री, जेज्रीयिता-त्री ;

ज्रयन्-न्ती, इत्यादीनि सर्वाण्यपि रूपाणि जिधातूपादानेन विहितानि कार्याणि विना, तद्वत् (599) बोध्यानि ।

(630) "ज्रि वयोहानौ" (X-चुरादिः-1816. सक. सेट्. उभ. आधृषीयः।)

"जॄ—' इति चौरादिकधातोर्नन्दिसम्मतः पाठ एवम्" इति **मा. धा. वृत्तौ** ।

आधृषीयत्वेनास्य धातोर्णिज्विकल्पः । णिच्पक्षे, णिजभावपक्षे च, शुद्धात् सन्नन्तात् यङन्ताच्च जिधातुवत् (599) धातुस्वरूपनिबन्धनकार्याणि विना बोध्यानि । ण्यन्तात् सनि तु—

जिज्राययिषकः-षिका, जिज्राययिषिता-त्री, जिज्राययिषन्-न्ती, जिज्राययिषिष्यन्-न्ती-ती, जिज्राययिषमाणः, जिज्राययिषिष्यमाणः, जिज्राययिट्-यिषौ-यिषः, जिज्राययिषितः-तवान्, जिज्राययिषुः, जिज्राययिषितव्यम्, जिज्राययिषणीयम्, जिज्राययिष्यम्, ईषज्जिज्राययिषः-दुर्जिज्राययिषः-सुजिज्राययिषः, जिज्राययिष्यमाणः, जिज्राययिषः, जिज्राययिषितुम्, जिज्राययिषा, जिज्राययिषणम्, जिज्राययिषित्वा, प्रजिज्राययिष्य, जिज्राययिषम् २, जिज्राययिषित्वा २ ; इति रूपाणीति विशेषः ।